# श्रीसुरसरस्वतीसभा शृङ्गेरि

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – 01-09-2024 अङ्काः – 50

अपराह्णे – 1:30 तः 3:00 पर्यन्तम् समयः – सार्धैकहोरा

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

1 **विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** 5

१. संस्कृतस्य महत्त्वम् २. रामायणे प्रतिज्ञापालनम् ३. वसुधैव कुटुम्बकम्

2 (अ) विभक्तिविपरिणामः नाम कः? सोदाहरणत्रयं विवृणुत । 4

(आ) दश लाकाराः के ? केषु अर्थेषु च एते उपयुज्यन्ते ? 4

3 (अ) "मधुरं मधु तस्माच्च सुधा तस्याः कवेर्वचः" – अत्रः कः अलङ्कारः इति सलक्षणं विशदयत । 4

(आ) वंशस्थ-वृत्तं सलक्षणं सोदाहरणं च विवृणुत । 4

4 **उत्तरं लिखत । (त्रयाणामेव)** 3

१. कस्मिन् प्रयोगे कर्मपदं न भवति ?

२. 'अलम्'-शब्दयोगे कस्मिन्नर्थे चतुर्थी-विभक्तिः उपयुज्यते ?

३. निर्धारण-योगे काः विभक्तयः उपयुज्यन्ते ?

४. उत्प्रेक्षा-अलङ्कारस्य लक्षणं किम् ?

5 **द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. अभूत् २. चक्रे ३. गन्ता ४. लप्सीष्ट

6 **प्रयोगपरिवर्तनं कुरुत ।** 4

१. बालैः हस्यते । २. सीतारामाभ्यां शिलायामुपविष्टम् ।

३. कृष्णेन कालियस्य फणासु नर्तितम् । ४. सूर्यः आकाशे प्रकाशते ।

**7 वाक्यदोषं परिहरत ।** **4**

१. पितुः साकं पुत्रः गतवान् ।

२. सुवृष्टिः चेत् भविष्यति सुभिक्षम् अभवत् ।

३. काव्येभ्यः नाटकं रम्यम् ।

४. हरिः रोचते भक्तिम् ।

**8 टिप्पणीं लिखत । (एकस्य)** **2**

१. वाक्योपयुक्तचिह्नानि                २. सतिसप्तमी

**9 मातृभाषया अनुवदत ।** **5**

१. स भगवान् नारायणः वसुदेवात् देवक्यां श्रीकृष्णनाम्ना अवततार ।

२. कः खलु नाम प्रवचनसमये शब्दमकरिष्यत् ?

३. पाण्डवाः द्वादश वर्षाणि वने अवात्सुः ।

४. दानेष्वन्नदानं प्रशस्यते ।

५. विक्रीते करिणि किम् अङ्कुशे विवादः ?

**10 संस्कृतभाषया परिवर्तयत ।** **5**

१. ನಾವು ಯಾರಿಗೂ ದ್ರೋಹವನ್ನೂ ಮಾಡುವುದಿಲ್ಲ.

We don’t cheat anyone.

२. ನಾವು ಗುರುಗಳ ಅನುಗ್ರಹದಿಂದ ವಿದ್ವಾಂಸರಾಗೋಣ.

May us become scholars by the grace of Guru.

३. ಬಾಲಕರು ಪಾಠಶಾಲೆಗೆ ಹೋಗಲಿಲ್ಲ.

Boys didn’t go to the school.

४. ಅವರು ರಜಾದಿನಗಳಲ್ಲಿ ಹಳ್ಳಿಗೆ ಹೋಗುವರು.

They will go to the village during the holidays.

५. ಹುಲಿಯ ಆರ್ಭಟವನ್ನು ಕೇಳಿ ಅವನಿಂದ ನಡುಗೋಣವಾಯಿತು.

By hearing the roar of the tiger, it was shivered by him.

---------------------------